# विश्वविद्यालयगीतम्



इदं सुन्दरं मन्दिरं शारदाया
मुम्बापुरीविश्वविद्यालयम् ।
कलाशास्त्रवाणिज्यशाखाधिरूढा
अमूढा विमुक्ता विहंगा वयम् ।।१।।
शृण्वन्तु सर्वे दृढं निश्चयम् ।।धृ।।

सत्यं वदामो धर्मं चरामो
नयामो नृणां दु:खभारं लयम् ।
स्वकार्ये रतानां सदा जागृतानां
भवेत्किं भविष्येऽपि कस्मात् भयम् ।।२।।
शृण्वन्तु सर्वे दृढं निश्चयम् ।।

युवा स्यात् बलिष्ठो युवा स्यात् गरिष्ठो
युवा ध्येयनिष्ठोऽपि भूयात् स्वयम् ।
यदि स्यात् युवा राष्ट्रकर्तव्यनिष्ठ:
सम्मानयेत् तं हि लोकत्रयम् ।।३।।
शृण्वन्तु सर्वे दृढं निश्चयम् ।।

वन्दामहे भारतं पूजनीयं
स्वदेशात् परं नास्ति देवालयम् ।
अत्रैव सर्वे प्रतिष्ठापयामो
ममत्वेन सार्धं समत्वं नयम् ।। ४।।
शृण्वन्तु सर्वे दृढं निश्चयम् ।।

कवी — श्री. वसंत बापट
संगीत — श्री. प्रभाकर पंडित